नमो नमो निम्मल दंसणस्स

आगमसुत्ताणि

(सटीकं)

भागः - ७

: संशोधकः सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः

नमो नमो निम्मल दंसणस्स

श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भागः-७

ज्ञाताधर्मकथाङ्गसूत्रं, उपासकदशाङ्गसूत्रं, अन्तकृद्दशाङ्गसूत्रं, अनुत्तरोपपातिकदशाङ्गसूत्रं, प्रश्नव्याकरणदशाङ्गसूत्रं

-: संशोधकः सम्पादकश्चः :-

मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं
मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-

''आगम आराधना केन्द्र'' शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञाताधर्मकथाङ्ग सूत्रस्य विषयानुक्रमः

मूलाङ्कः	विषयः	पृष्टाङ्कः
	श्रुतस्कन्धः-१	
१-४१	अध्ययनं-१ उत्क्षिप्तज्ञातं	५
-५४	अध्ययनं-२ संघाटकं	८७
-६१	अध्ययनं-३ अण्डः	९९
-६२	अध्ययनं-४ कूर्म्मः	१०५
-७३	अध्ययनं-५ शैलकः	१०८
-७४	अध्ययनं-६ तुम्बकः	१२२
-७५	अध्ययनं ७ रोहिणी	१२३
-१०९	अध्ययनं-८ मल्ली	१२९
-१४०	अध्ययनं-९ माकन्दी	१६४
-१४१	अध्ययनं-१० चन्द्रमा	१७९
-१४२	अध्ययनं-११ दावद्रवः	१८०
-१४४	अध्ययनं-१२ उदकज्ञातः	१८२
-१४७	अध्ययनं-१३ दर्दुरकः	१८६
-१५६	अध्ययनं-१४ तैतली पुत्रं	१९२
-१५७	अध्ययनं-१५ नन्दीफलं	२००
-१८३	अध्ययनं-१६ अपरकङ्का	२०३
-२०७	अध्ययनं-१७ अश्वः	२३३
-२१२	अध्ययनं-१८ सुंसुमा	२४१
-२१९	अध्ययनं-१९ पुंडरीकः	२४८

मूलाङ्कः	विषयः	पृष्टाङ्कः
	श्रुतस्कन्धः-२	
-२२४	वर्गः-१ चमरेन्द्रअग्रमहिषी काली, राजी, रजनी, विद्युत, मेघा (पञ्च अध्ययनानि)	२५२
-२२५	वर्गः-२ बलीन्द्रअग्रमहिषी ''शुंभा'' दि पञ्च अध्ययनानि	२५६
-२२६	वर्गः-३ धरणादिमहिषी ''इला'' दि ५४ अध्ययनानि	२५७
-२२७	वर्गः-४ भूतानंदादिमहिषी 'रुचा' दि ५४ अध्ययनानि	२५७
-२३३	वर्गः-५ पिशाचादिमहिषि 'कमला' दि ३२ अध्ययनानि	२५७
-२३४	वर्गः-६ महाकालेन्द्रमहिषी	२५८
-२३५	वर्गः-७ सूर्यअग्रमहिषी 'सूर्यप्रभा' दि ४ अध्ययनानि	२५८
-२३६	वर्गः-८ चन्द्रअग्रमहिषी	२५८
-२३७	वर्गः-९ शक्रअग्रमहिषी 'पद्मा' दि ८ अध्ययनानि	२५९
-२४१	वर्गः-१० ईशानेन्द्रमहिषी 'कृष्णा' दि ८ अध्ययनानि	२५९

उपासकदशाङ्गसूत्रस्य विषयानुक्रमः

मूलाङ्कः	विषयः	पृष्टाङ्कः	मूलाङ्कः	विषयः	पृष्टाङ्कः
१-१९	१- आनंदः	२६१	-४०	६- कुण्डकोलिकः	२९८
-२८	२- कामदेवः	२८०	-४७	७- सद्दालपुत्रः	३००
-३१	३- चुलनीपिता	२९३	-५६	८- महाशतकः	३०९
-३३	४- सुरादेवः	२९६	-६७	९- नन्दीनिपिता	३१४
-३४	५- चुल्लशतकः	२९७	-७३	१०- लेइयापिता	३१८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्तकृद्दशाङ्ग सूत्रस्य विषयानुक्रमः

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
१-६	वर्गः-१ गौतमआदि १० अध्ययनानि	३१७	-२२	वर्गः-५ 'पद्मावती आदि' १० अध्ययनानि	३३१
-९	वर्गः-२ 'अक्षोभा' दि ८ अध्ययनानि	३१९	-४०	वर्गः-६ 'मकाई' आदि १६ अध्ययनानि	३३५
-१४	वर्गः-३ 'अनीयशा दि' १३ अध्ययनानि	३२०	-४५	वर्गः-७ 'नंदा' दि १३ अध्ययनानि	३४२
-१७	वर्गः-४ 'जालि' आदि १० अध्ययनानि	३३०	-६२	वर्गः-८ 'कालि' आदि १० अध्ययनानि	३४२

अनुत्तरोपपातिकदशाङ्ग सूत्रस्य विषयानुक्रमः

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
१-२	वर्गः-१ जालि, मयालि, उवयालि आदि १० अध्ययनानि	३५१	-१३	वर्गः-३ धन्य, सुनक्षत्र, ऋषिदास, पेल्लक, रामपुत्र, चन्द्र, पृष्टिम, पेढालपुत्र, पोट्टिल, वेहल्ल इति १० अध्ययनानि	३५३
-६	वर्गः-२ दीर्घसेन, महासेन, लष्टदंत आदि १३ अध्ययनानि	३५२			

प्रश्नव्याकरणाङ्ग सूत्रस्य विषयानुक्रमः

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
-	आश्रवद्वार [श्रुत०-१]		-	संवरद्वार [श्रुत०-२]	
१-८	अध्ययनं-१, प्राणातिपातः	३६१	-३५	अध्ययनं १ अहिंसा	४५८
-१२	अध्ययनं २, मृषावादः	३८६	-३७	अध्ययनं-२ सत्यं	४७३
-१६	अध्ययनं-३ अदत्तादानं	४०२	-३८	अध्ययनं-३ दत्तानुज्ञा	४८२
-२०	अध्ययनं-४ अब्रह्मं	४२४	-४३	अध्ययनं-४ ब्रह्मचर्य	४९०
-२९	अध्ययनं-५ परिग्रहः	४५०	-४७	अध्ययनं-५ अपरिग्रहः	५०३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाविष्टाः आगमाः

(१) ज्ञाताधर्मकथाङ्गसूत्रम्

(२) उपासकदशाङ्गसूत्रम्

(३) अन्तकृद्दशाङ्गसूत्रम्

(४) अनुत्तरोपपातिकदशाङ्गसूत्रम्

(५) प्रश्नव्याकरणदशाङ्गसूत्रम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અટ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

७ उपासकदशाङ्गसूत्रम्

सटीकं

(सप्तमं अङ्गसूत्रम्)

(मूलसूत्रम् + अभयदेवसूरिविरचिता वृत्तिः)

॥१॥ श्रीवर्द्धमानमानम्य, व्याख्या काचिद्विधीयते ।
उपासकदशादीनां, प्रायो ग्रन्थान्तरेक्षिता ॥

वृ. तत्रोपासकदशाः सप्तममङ्गं, इह चायमभिधानार्थः– उपासकानां–श्रमणोपासकानां सम्बन्धिनोऽनुष्ठानस्य प्रतिपादिका दशाः–दशाध्ययनरूपा उपासकदशाः, बहुवचनान्तमेतद् ग्रन्थनाम् । आसां च सम्बन्धाभिधेयप्रयोजनानि नामान्वर्थसामर्थ्येनैव प्रतिपादितान्यवगन्तव्यानि, तथाहि–उपासकानुष्ठानमिहाभिधेयं तदवगमश्च श्रोतॄणामनन्तरप्रयोजनं, शास्त्रकृतां तु तत्प्रतिबोधनमेव तत्, परम्परप्रयोजनमं तूभयेषामप्यपवर्गप्राप्तिरिति । सम्बन्धस्तु द्विविधः शस्त्रेष्वभिधीयते– उपायोपेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च, तत्रोपायोपेयभावलक्षणः शस्त्रनामान्वर्थसामर्थ्येनैवासामभिहितः, तथाहि–इदं शस्त्रमुपाय एतत्साध्योपासकानुष्ठानावगम- श्चोपेयमित्युपायोपेयभावलक्षणः सम्बन्धः, गुरुपर्वक्रमलक्षणं तु सम्बन्धं साक्षाद्दर्शयितुमाह–

मू. *(१) तेणं कालेणं तेणं समएणं चम्पा नामं नयरी होत्था, वण्णओ, पुणभद्दे चेइए ।*

मू. *(२) तेणं कालेणं तेणं समएणं अज्जसुहम्मे समोसरिए जाव जम्बु पज्जुवासमाणे एवं वयासी–जइ णं भंते ! समणेणं भगवया महावीरेणं जाव संपत्तेणं छट्ठस्स अङ्गस्स नायाधम्मकहाणं अयमट्ठे पन्नत्ते सत्तमस्स णं भंते ! अङ्गस्स उवासगदसाणं समणेणं जाव संपत्तेणं के अट्ठे प० ?, एवं खलु जंबू ! समणेणं जाव संपत्तेणं सत्तमस्स अङ्गस्स दस अज्झयणा प० तं०–*

वृ. 'तेणं कालेणं तेणं समएणमि'त्यादि, सर्वं चेदं ज्ञातधर्मकथाप्रथमाध्ययनविवरणानुसारेणानुगमनीयां ।

मू. *(३) आनंदे १ कामदेवे य २, गाहावइ चुलणीपिया ३ । सुरादेवे ४ चुल्लसयए ५, गाहावइ कुंडकोलिए ६ सद्दालपुत्ते ७ महासयए ८, नंदिनीपिया ९ सालिहीपिंया १० ।*

वृ. नवरं 'आनन्दे' इत्यादि रूपकं, तत्रानन्दाभिधानोपासकवक्तव्यताप्रतिबद्धमध्ययनमानन्द एवाभिधीयते, एवं सर्वत्र, 'गाहावइ'त्ति गृहपतिः ऋद्धिमद्विशेषः 'कुण्डकोलिए'त्ति रूपकान्तः ।

मू. *(४) जइ णं भंते ! समणेणं जाव संपत्तेणं सत्तमस्स अङ्गस्स उवासगदसगाणं दस अज्झयणा पन्नत्ता पढमस्स णं भन्ते ! समणेणं जाव संपत्तेणं के अट्ठे पन्नत्ते ? ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५) एवं खलु जंबू ! तेणं कालेणं तेणं समएणं वाणियगामे नामं नयरे होत्था, वण्णओ, तस्स णं वाणियगामस्स नयरस्स बहियाउत्तरपुरच्छिमे दिसीभाए दूइपलासए नामं चेइए, तत्थ णं वाणियगामे नयरे जियसत्तू राया होत्था वण्णओ, तत्थ णं वाणियगामे आनंदे नामं गाहावई परिवसइ, अड्ढे जाव अपरिभूए ॥

तस्स णं आनंदस्स गाहावइस्स चत्तारि हिरण्णकोडीओ निहाणपउत्ताओ चत्तारि हिरण्ण कोडीओ वुड्ढिपउत्ताओ चत्तारि हिरण्णकोडिओ पवित्थरपउत्ताओ चत्तारि वया दसगोसाहस्सिएणं वएणं होत्था ॥ से णं आनंदे गाहावई बहूणं राईसर जाव सत्थवाहाणं बहूसु कज्जेसु य कारणेसु य मन्तेसु य कुडुम्बेसु य गुज्झेसु य रहस्सेसु य निच्छएसु य ववहारेसु य आपुच्छणिज्जे पडिपुच्छणिज्जे सयस्सवि य णं कुडुम्बस्स मेढी पमाणं आहारे आलम्बणं चक्खू, मेढीभूए जाव सव्वकज्जवड्ढावए यावि होत्था ॥

तस्स णं आनंदस्स गाहावइस्स सिवानंदा नामं भारिया होत्था, अहीण जाव सुरुवा आनंदस्स गाहावइस्स इट्ठा आनंदेणं गाहावइणा सद्धिं अणुरत्ता अविरत्ता इट्ठा सद्द जाव पञ्चविहे माणुस्सए कामभोए पच्चणुभवमाणी विहरइ ॥ तस्स णं वाणियगामस्स बहिया उत्तरपुच्छिमे दिसीभाए एत्थ णं कोल्लाए नामं सन्निवेसे होत्था, रिद्धत्थिमिय जाव पासादीए ४ ॥

तत्थ णं कोल्लाए सन्निवेसे आनंदस्स गाहावइस्स बहुए मित्तनाइयगसयणसम्बन्धिपरिजणे परिवसइ, अड्ढे जाव अपरिभूए । तेणं कालेणं तेणं समएणं समणे भगवं महावीरे जाव समोसरिए, परिसा निग्गया, कोणिए राया जहा तहा जियसत्तू निग्गच्छइ २ त्ता जाव पज्जुवासइ ॥

तए णं से आनंदे गाहावई इमीसे कहाए लद्धट्ठे समाणे एवं खलु समणे जाव विहरइ, तं महाफलं जाव गच्छामि णं जाव पज्जुवासामि, एवं सम्पेहेइ २ त्ता ण्हाए सुद्धप्पावेसाइं जाव अप्पम-हग्घाभरणालङ्कियसरीरे सयाओ गिहाओ पडिनिक्खमइ २ त्ता सकोरण्टमल्लदामेणं छत्तेणं धरिज्जमाणेणं मणुस्सवग्गुरापरिक्खित्ते पायविहारचारेणं वाणियगामं नयरं मज्झंमज्झेणं निग्गच्छइ २ त्ता जेणामव दूइपलासे चेइए जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ त्ता तिखुत्तो आयाहिणं पयाहिणं करेइ २ त्ता वन्दइ नमंसइ जाव पज्जुवासइ ॥

वृ. 'प्रविस्तरो' धनधान्यद्विपदचतुष्पदादिविभूतिविस्तरः, 'व्रजा' गोकुलानि, दशगोसाहस्रिकेण–गोसहस्रदशकपरिमाणेनेत्यर्थः ।

मू. (६) तए णं समणे भगवं महावीरे आनंदस्स गाहावइस्स तीसे य महइमहालियाए जाव धम्मकहा, परिसा पडिगया, राया य गए ॥

मू. (७) तए णं से आनंदे गाहावई समणस्स भगवओ महावीरस्स अन्तिए धम्मं सोच्चा निस्स हट्ठतुट्ठ जाव एवं वयासी–सद्दहामि णं भंते ! निग्गन्थं पावयणं पत्तियामि णं भंते ! निग्गन्थं पावयणं रोएमि णं भंते ! निग्गंथं पावयणं एवमेयं भंते तहमेयं भंते ! अवितहमेयं भंते ! इच्छियमेयं भंते ! पडिच्छियमेयं भंते ! इच्छियपडिच्छियमेयं भंते ! से जहेयं तुब्भे वयत्तिकट्टु,

जहा णं देवाणुप्पियाणं अंतिए बहवे राईसरतलवरमाडम्बियकोडुम्मबिय- सेट्ठिसेणा-वइसत्थवाहप्पिइओ मुण्डे भवित्ता अगाराओ अनगारियं पव्वइया नो खलु अहं तहा संचाएमि मुण्डे जाव पव्वइत्तए, अहं णं देवाणुप्पियाणं अन्तिए पञ्चाणुव्वइयं सत्तसिक्खावइयं दुवालसविहं गिहिधम्मं पडिवज्जिस्सामि, अहासुहं देवाणुप्पिया ! मा पडिबंनं करेह ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (८) तए णं से आनंदे गाहावई समणस्स भगवओ महावीरस्स अन्तिए तप्पढमयाए थूलगं पाणाइवायं पच्चक्खाइ जावज्जीवाए दुविहं तिविहेणं न करेमि न कारवेमि मणसा वयसा कायसा १ । तयानंतरं च णं थूलगं मुसावायं पच्चक्खाइ जावज्जीवाए दुविहं तिविहेणं न करेमि न कारवेमि मणसा वयसा कायसा २ ।

तयानंतरं च णं थूलगं अदिन्नादाणं पच्चक्खाइ जावज्जीवाए दुविहं तिविहेणं न करेमि न कारवेमि मणसा वयमा कायसा ३ । तयानंतरं च णं सदारसंतोसिए परिमाणं करेइ, नन्नत्थ एक्काए सिवानंदाए भारियाए, अवसेसं सव्वं मेहुणविहिं पच्चक्खामि म० ३, ४।

तयानंतरं च णं इच्छाविहिपरिमाणं करेमाणे हिरण्णसुवण्णविहिपरिमाणं करेइ, नन्नत्थ चउहिं हिरण्णकोडीहिं निहाणपउत्ताहिं चउहिं वुड्ढिपउत्ताहिं चउहिं पवित्थरपउत्ताहिं, अवसेसं सव्वं हिरण्णसुवण्णविहिं पच्चक्खामि ३, तयानंतरं च णं चउप्पयविहिपरिमाणं करेइ, नन्नत्थ चउहिं वएहिं दसगोसाहस्सिएणं वएणं, अवसेसं सव्वं चउप्पयविहिं पच्चक्खामि ३, तयानंतरं च णं खेत्तवत्थुविहिपरिमाणं करेइ, नन्नत्थ पञ्चहिं हलसएहिं नियत्तणसइएणं हलेणं, अवसेसं सव्वं खेत्तवत्थुविहिं पच्चक्खामि ३, तयानंतरं च णं सगडविहिपरिमाणं करेइ, नन्नत्थ पञ्चहिं सगडसएहिं दिसायत्तिएहिं पञ्चहिं सगडसएहिं संवाहणिएहिं, अवसेसं सव्वं सगडविहिं पच्चखामि ३, तयानंतरं च णं वाहणविहिपरिमाणं करेइ, नन्नत्थ चउहिं वाहणेहिं दिसायत्तिएहिं चउहिं वाहणेहिं संवाहणिएहिं, अवसेसं सव्वं वाहणविहिं पच्चक्खामि ३, ५ ।

तयानंतरं च णं उवभोगपरिभोगविहिं पच्चक्खाएमाणे उल्लणियाविहिपरिमाणं करेइ, नन्नत्थ एगाए गन्धकासाईए, अवसेसं सव्वं उल्लणियाविहिं पच्चक्खामि ३, तयानंतरं च णं दन्तवणविहिपरिमाणं करेइ, नन्नत्थ एगेणं अल्ललट्ठीमहुएणं, अवसेसं दन्तवणविहिं पच्चक्खामि ३ । तयानंतरं च फलविहिपरिमाणं करेइ, नन्नत्थ खीरामलएणं, अवसेसं फलविधि पच्चक्खामि ३, तयानंतरं च णं अब्भङ्गणविहिपरिमाणं करेइ, नन्नत्थ सयपागसहस्सपागेहिं तेल्लहिं, अवसेसं अब्भंगणविहिं पच्चक्खामि ३,

तयानंतरं च णं उव्वट्टणाविहिपरिमाणं करेइ, नन्नत्थ एगेणं सुरहिणा गन्धट्टएणं, अवसेसं उव्वट्टणाविहिं पच्चक्खामि ३, तयानंतरं च णं मज्जणविहिपरिमाणं करेइ, नन्नत्थ अट्ठहिं उट्टिएहिं उदगस्स घडएहिं, अवसेसं मज्जणविहिं पच्चक्खामि ३, तयानंतरं च णं वत्थविहिपरिमाणं करेइ, नन्नत्थ एगेणं खोमजुयलेणं, अवसेसं वत्थविहिं पच्चक्खामि ३, तयानंतरं च णं विलेवणविहिपरिमाणं करेइ, नन्नत्थ अगरुकुङ्कुमचन्दणमाहिएहिं, अवसेसं विलेवणविहिं पच्चक्खामि ३, तयानंतरं च णं पुप्फविहिपरिमाणं करेइ, नन्नत्थ एगेणं सुद्धपउमेणं मालइकुसुमदामेणं वा, अवसेसं पुप्फविहिं आभरणविहिं पच्चक्खामि ३, तयानंतरं च णं धूवणविहिपरिमाणं करेइ, नन्नत्थ अगरुतुरुक्कधूवमादिएहिं, अवसेसं धूवणविहिं पच्चक्खामि ३, तयानंतरं च णं भोयणविहिपरिमाणं करेमाणे पेज्जविहिपरिमाणं करेइ, नन्नत्थ एगाए कट्ठपेज्जाए, अवसेसं पेज्जविहिं पच्चक्खामि ३, तयानंतरं च णं भक्खविहिपरिमाणं करेइ, नन्नत्थ एगेहिं घयपुण्णेहिं खण्डखज्जएहिं वा, अवसेसं भक्खविहिं पच्चक्खामि ३,

तयानंतरं च णं ओदनविहिपरिमाणं करेइ, नन्नत्थ कलमसालिओदनेणं, अवसेसं ओदनविहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पच्चक्खामि ३, तयानंतरं च णं सूवविहिपरिमाणं करेइ, नन्नत्थ कलायसूवेण वा मुग्गमासूवेण वा, अवसेसं सूवविहिं पच्चक्खामि ३, तयानंतरं च णं घयविहिपरिमाणं करेइ, नन्नत्थ सारइएणं गोघयमण्डेणं, अवसेसं घयविहिं पच्चक्खामि ३, तयानतरं च णं सागविहिपरिमाणं करेइष नन्नत्थ वत्थुसाएण वा सुत्थियसाएण वा मण्डुक्कियसाएण वा, अवसेसं सागविहिं पच्चक्खामि ३, तयाणन्तरं च णं माहुरयविहिपरिमाणं करेइ, नन्नत्थ एगेणं पालङ्गामुहारएणं, अवसेसं माहुरयविहिं पच्चक्खामि ३, तयानंतरं च णं जेमणविहिपरिमाणं करेइ, नन्नत्थ सेहंबदालियंबेहिं, अवसेसं जेमणविहिं पच्चक्खामि ३, तयानंतरं च णं पाणियविहिपरिमाणं करेइ, नन्नत्थ एगेणं अन्तलिक्खोदएणं, अवसेसं पाणियविहिं पच्चक्खामि ३, तयानंतरं च णं मुहवासविहिपरिमाणं करेइ, नन्नत्थ पञ्चसोग- न्धिएणं तम्बोलेणं, अवसेसं मुहवासविहिं पच्चक्खामि ३, ६।

तयानंतरं च णं चउव्विहं अणट्ठादण्डं पच्चक्खाइ, तंजहा—अवज्झाणायरियं पमायायरियं हिंसप्पयाणं पावकम्मोवएसे ३, ७।

वृ. 'तप्पढमयाए' त्ति तेषाम्—अणुव्रतादीनां प्रथमं तत्प्रथमं तद्भावस्तत्प्रथमता तया 'थूलगं' ति त्रसविषयं 'जावज्जीवाए' त्ति यावती चासौ जीवा च—प्राणधारणं यावज्जीवा यावान् वा जीवः—प्राणधारणं यस्यां प्रतिज्ञायां सा यावज्जीवा तया,

'दुविहं' ति करणकारणभेदेन द्विविधं प्राणातिपातं 'तिविहेणं' ति मनःप्रभृतिना करणेन 'कायस' त्ति सकारस्यागमिकत्वात्कायेनेत्यर्थः, न करोमीत्यादिनैतदेव व्यक्तीकृतं । स्थूल-मृषावादःतीव्रसंक्लेशात्तीव्रस्यैव संक्लेशस्योत्पादकः ।

स्थूलकमदत्तादानं—चौर इति व्यपदेशनिबन्धनं ।

स्वदारैः सन्तोषः स्वदारसन्तोषः स एव स्वदारसन्तोषिकः स्वदारसन्तोषिर्वा स्वदारसन्तुष्टिः, तत्र परिमाणं—बहुभिर्दारैरुपजायमानस्य सङ्क्षेपकरणं, कथम् ? — 'नन्नत्थे' ति न मैथुनमाचरामि अन्यत्र एकस्याः स्त्रियाः, किमभिधानायाः ? शिवानन्दायाः, किम्भूतायाः ? भार्यायाः' स्वस्येति गम्यते, एतदेव स्पष्टयन्नाह—अवशेषं—तद्वर्जं मैथुनविधिं तत्प्रकारं तत्कारणं वा, तथा वृद्धव्याख्या तु 'नन्नत्थ' त्ति अन्यत्र तां वर्जयित्वेत्यर्थः । हिरण्णं ति—रजतं सुवर्णं—प्रतीतं विधिः—प्रकारः, 'नन्नत्थ' त्ति न— नैव करोमीच्छां हिरण्यादौ, अन्यत्र चतसृभ्यो हिरण्यकोटीभ्यः, ता वर्जयित्वेत्यर्थः, 'अवसेसं' ति शेषं तदतिरि- क्तमित्येवं सर्वत्रावसेयम्, 'खेत्तवत्थु' त्ति—इ क्षेत्रमेव वस्तु क्षेत्रवस्तु ग्रन्थान्तरे तु क्षेत्रं च वास्तु च—गृहं क्षेत्रवास्तु इति व्याख्यायते,

'नियत्तणसइएणं' ति निवर्त्तनं—भूमिपरिमाणविशेषो देशविशेषप्रसिद्धः ततो निवर्त्तनशतं कर्षणीयत्वेन यस्यास्ति तन्निवर्त्तनशतिकं तेन, 'दिसायत्तिएहिं' ति दिग्यात्रा—देशान्तरगमनं प्रयोजनं येषां तानि दिग्यात्रिकानि तेभ्योऽन्यत्र, 'संवाहणिएहिं' ति संवाहनं क्षेत्रादिभ्यस्तृणकाष्ठ-धान्यादेर्गृहादावानयनं तत्प्रयोजनानि सांवाहनिकानि तेभ्योऽन्यत्र, 'वाहणेहिं' ति यानपात्रेभ्यः,

'उवभोगपरिभोग' त्ति उपभुज्यते—पौनःपुन्येन सेव्यत इत्युपभोगो—भवनवसनवनितादिः परिभुज्यते—सकृदासेव्यत इति परिभोगः—आहारकुसुमविलेपनादिः व्यत्ययो वा व्याख्येय इति, 'उल्लणिय' त्ति ानस्नानजलार्द्रशरीरस्य जललूषणवस्त्रं, 'गन्धकासाईए' त्ति गन्धप्रधाना कषायेण रक्ता शाटिका गन्धकाषायी तस्याः, 'दन्तवण' त्ति दन्तपावनं—दन्तमलापकर्षणकाष्ठम्, 'अल्ललट्ठीम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हुएणं' ति आर्द्रेणं यष्टीमधुना—मधुरसवनस्पतिविशेषेण, 'खीरामलएणं' ति अबद्धास्थिकं क्षीरमिव मधुरं वा यदामलकं तस्मादन्यत्र, 'सयपागसहस्सपागेहिं' ति द्रव्यशतस्य सत्कं क्वाथशतेन सह यत्पच्यते कार्षापणशतेन वा तच्छतपाकम्, एवं सहस्रपाकमपि, 'गन्धट्टएणं' ति गन्धद्रव्याणामुपलकुष्ठादीनां 'अट्टओ' त्ति चूर्णं गोधूमचूर्णं वा गन्धयुक्तं तस्मादन्यत्र, 'उट्टिएहिं उदगस्स घडएहिं' ति उष्ट्रिका—बृहन्मृन्मयभाण्डं तत्पूरणप्रयोजना ये घटास्त उष्ट्रिकाः, उचितप्रमाणा नातिलघवो महान्तो वेत्यर्थः, इह च सर्वत्रान्यत्रेतिशब्दप्रयोगेऽपि प्राकृतत्वात्पञ्चम्यर्थे तृतीया द्रष्टव्येति, 'खोमजुयलेणं' ति कार्पासिकवयुगलादन्यत्र, 'अगरु' त्ति अगुरुर्गन्धद्रव्यविशेषः,

'सुद्धपउमेणं' ति कुसुमान्तरवियुतं पुण्डरीकं वा शुद्धपद्मं ततोऽन्यत्र, 'मालइकुसुमदाम' त्ति जातिपुष्पमाला 'मडकण्णेज्जएहिं' ति मृष्टाभ्याम्—अचित्रवद्भ्यां कर्णाभरणविशेषाभ्यां 'नाममुद्द' त्ति नामाङ्किता मुद्रा—अङ्गुलीयकं नाममुद्रा, 'तुरुक्कधूव' त्ति सेल्हक- लक्षणो धूपः, 'पेज्जविहिं' ति पेयाहारप्रकारं 'कट्ठपेज्ज' त्ति मुद्गादियूषो घृततलिततण्डुलपेया वा, 'भक्ख' त्ति खरविशदमभ्यवहार्यं भक्षमित्यन्यत्र रूढम्, इह तु पक्वान्नमात्रं तद्विवक्षितं, 'घय- पुण्ण' त्ति घृतपूराः प्रसिद्धाः, 'खण्डखज्ज' त्ति खण्डलिप्तानि खाद्यानि अशोकवर्त्तयः खण्डखाद्यानि, 'ओदण' त्ति ओदनः—कूरं, कलत्त सालि' त्ति पूर्वदेशप्रसिद्धः, 'सूव' त्ति सूपः कूरस्य द्वितीयाशनं प्रसिद्ध एव 'कलायसूवे' त्ति कलायाः चणकाकारा धान्यविशेषा मुद्गा माषाश्च प्रसिद्धः, 'सारइएणं गोधयमण्डेणं' ति शारदिकेन शरत्कालोत्पन्नेन गोधृतमण्डेन—गोघृतसारेण, 'साग' त्ति शाको वस्तुलादिः, 'चुचुसाए' त्ति चूचुशाकः,सौवस्तिकशाको मण्डूकिकाशाकश्चे लोकप्रसिद्धा एव, 'माहुरय' त्ति अनम्लरसानि शालनकानि, 'पालङ्ग' त्ति वल्लीफलविशेषः, 'जेमण' त्ति जेमनानि वटकपूरणादीनि, 'सेहंबदालियंबेहिं' ति सेधे—सिद्धौ सति यानि अम्लेन—तीमनादिना संस्क्रियन्ते तानि सेधाम्लानि यानि दाल्या मुद्गादिमय्या निष्पादितानि अम्लानि च तानि दालिकाम्लानीति सम्भाव्यन्ते,

'अन्तलिक्खोदयं' ति यज्जलमाकाशान्पतदेव गृह्यते तदन्तरिक्षोदकम्, 'पञ्चसोगन्धिएणं' ति पञ्चभिः—एलालवङ्गकर्पूरकक्कोलजातीफललक्षणैः सुगन्धिभिर्द्रव्यैरभिसंस्कृतं पञ्चसौगन्धिकम् ।

'अणट्ठादण्ड' न्ति अनर्थेन – धर्मार्थकामव्यतिरेकेण दण्डोऽनर्थदण्डः, 'अवज्झाणायरियं' ति अपध्यानम्—आर्त्तरौद्ररूपं तेनाचरितः—आसेवितो योऽनर्थदण्डः स तथा तं, एवं प्रमादाचरितमपि, नवरं प्रमादो—विकथारूपोऽस्थगिततैलाजनधरणादिरूपो वा, हिंस्रंहिंसाकारि शस्त्रादि तत्प्रदानं—परेषां समर्पणं, 'पापकर्मोपदेशः' 'क्षेत्राणि कृषत' इत्यादिरूपः,

मू. (९) *इह खलु आनंदाइ समणे भगवं महावीरे आनंदं समणोवासगं एवं वयासी—"एवं खलु आनंदा! समणोवासएणं अभिगयजीवाजीवेणं जाव अणइक्कमणिज्जेणं सम्मत्तस्स पञ्च अइयारा पेयाला जाणियव्वा न समायरियव्वा, तंजहा—सङ्का कङ्खा विइगिच्छा परपासंडपसंसा परपासंडसंथवे*

तयानंतरं च णं थूलगस्स पाणाइवायवेरमणस्स समणोवासएणं पच अइयारा पेयाला- जाणियव्वा न समायरियव्वा, तंजहा—बंधे वहे छविच्छेए अइभारे भत्तपाणवोच्छेए १ ।

तयानंतरं च णं थूलगस्स मुसावायवेरमणस्स पच अइयारा जाणियव्वा न समायरिव्वा, तंजहा—सहसाअब्भक्खाणे रहसाअब्भक्खाणे सदारमन्तभेए मोसोवएसे कूडलेहकरणे २ ।

तयानंतरं च णं थूलगस्स अदिन्नादानवेरमणस्स पच अइयारा जाणियव्वा न समाय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रियव्वा, तंजहा–तेणाहडे तक्करप्पओगे विरुद्धज्ज्राइक्कमे कूडतुलकूडमाणे तप्पडिरूवगववहारे ३

तयानंतरं च णं सदारसन्तोसिए पंच अइयारा जाणियव्वा न समायरियव्वा, तंजहा–इत्तरियपरिग्गहियागमणे अपरिग्गहियगमणे अनंगकीडा परविवाहकरणे कामभोगतिव्वाभिलासे ४।

तयानंतरं च इच्छापरिमाणस्स समणोवासएणं पचं अइयारा जाणियव्वा न समायरियव्वा, तंजहा–खेत्तवत्थुपमाणाइक्कमे हिरण्णसुवण्णपमाणाइक्कमे दुपयचउप्पयमाणाइक्कमे धणधन्नपमाणाइक्कमे कुवियपमाणाइक्कमे ५, ।

तयानंतरं च णं दिसिवयस्स पचं अइयारा जाणियव्वा न समायरियव्वा, तंजहा–उड्ढदिसिपमाणाइक्कमे अहोदिसिपमाणाइक्कमे तिरियदसिपमाणाइक्कमे खेत्तवुड्ढी सइअन्तरद्धा ६

तयानंतरं च णं उवभोगपरिभोगे दुविहे पन्नत्ते, तंजहा–भोयणओ य कम्मओ य, तत्थ णं भोयणओ समणोवासएणं पचं अइयारा जाणियव्वा न समायरियव्वा, तंजहा–सचित्ताहारे सचित्तपडिबद्धहारे अप्पउलिओसहिभक्खणया दुप्पउलिओसहमक्खणया तुच्छोसहिभक्खणया, कम्मओ णं समणोवासएणं पनरस कम्मादानाइं जाणियव्वाइं न समायरियव्वाइं, तंजहा–इङ्गालकम्मे वणकम्मेसाडीकम्मे भाडीकमम्मे फोडीकम्मे दंतवाणिज्जे लक्खवाणिज्जे रसवाणिज्ज विसवाणिज्जे केसवाणिज्जे जन्तपीलणकम्मे मनिल्लञ्छणकम्मे दवग्गिदावणया सरदहतलावसोसणया असईजणपोसणया ७।

तयानंतरं च णं अणट्ठादण्डवेरमणस्स समणोवासएणं पञ्च अइयारा जाणियव्वा न समायरियव्वा, तंजहा–कन्दप्पे कुक्कुइए मोरिए सञ्जुत्ताहिगरणे उवभगपरिभोगइरित्ते ८।

तयानंतरं च णं सामाइयस्स समणोवासएणं पचं अइयारा जाणियव्वा न समायरियव्वा, तंजहा–मणदुप्पणिहाणे वयदुप्पणिहाणे कायदुप्पणिहाणे सामाइयस्स सइअकरणया सामाइयस्स अणवट्ठियस्स करणया ९।

तयानंतरं च णं देसावगासियस्स समणोवासएणं पचं अइयारा जाणियव्वा न समायरियव्वा, तंजहा–आणवणप्पओगे पेसवणप्पओगे सद्दाणुवाए रूवाणुवाएअ बहिया पोग्गलपक्खेवे १०।

तयानंतरं च णं पोसहोववासस्स समणोवासएणं पचं अइयारा जाणियव्वा, न समायरियव्वा तंजहा–अप्पडिलेहियदुप्पडिलेहियसिज्ञासंथारे अप्पमज्जियदुप्पमज्जियसिज्ञासंथारे अप्पडिलेहियदुप्पडिलेहियउच्चारपासवणभूमी अप्पमज्ञियदुप्पमज्ञियउच्चारपासवणभूमी पोसहोववासस्स सम्मं अननुपालणया ११।

तयानंतरं च णं अहासंविभागस्स समणोवासएणं पचं अइयारा जाणियव्वा न समायरियव्वा तंजहा–सचित्तनिक्खेवणया सचित्तपिहणया कालाइक्कमे परववदेसे मच्छरिया १२।

तयानंतरं च णं अपच्छिममारणन्तियसंलेहणाझूसणाराहणाए पचं अइयारा जाणियव्वा, न समायरियव्वा तंजहा–इहलोगासंसप्पओगे परलोगसंसप्पओगे जीवियासंसप्पओगे मणासंसप्पओगे कामोगासंसप्पओगे १३।

वृ. 'आनंदाइ'त्ति हे आनन्द इत्येवंप्रकारेणामन्त्रणवचनेन श्रमणो भगवान् महावीर आनन्दमेवमावादीदिति, एतदेवाह–'एवं खलु आनंदे'त्यादि,

'अइयारा पेयाल' त्ति अतिचारा–मिथ्यात्वमोहनीयोदयविशेषादात्मनोऽशुभाः परिणाम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषा ये सम्यकत्वमतिचारयन्ति ते चानेकप्रकारा गुणिनामनुपबृंहादयः ततस्तेषां मध्ये 'पेयाल'त्ति साराः-प्रधानाः स्थूलत्वेन शक्यव्यपदेशत्वाद् ये ते तथा तत्र शङ्का-संशयकरणं काङ्क्षा-अन्यान्यदर्शनग्रहः विचिकित्सा-फलंप्रति शङ्का विद्वज्जुगुप्सा वा-साधूना जात्यादिहीलनेति, परपाषण्डाः-परदर्शनिनस्तेषां प्रशंसा-गुणोत्कीर्त्तनं परपाषण्डसंस्तवः-तत्परिचयः ।

तथा 'बन्धे'त्ति बन्धो द्विपदादीनां रज्ज्वादिना संयमनं 'वहे' त्ति वधो यष्ट्यादिभिस्ताडनं 'छविच्छेए'त्ति शरीरावयवच्छेदः 'अइभारे'त्ति अतिभारारोपणं तथाविधशक्तिविकलानां महाभारारोपणं 'भत्तपाणवोच्छेए'त्ति अशनपानीयाद्यप्रदानं, इहायं विभागः पूज्यैरुक्तः-

॥ १ ॥ 'बन्धवहं छविछेइं अइभारं भत्तपाणवोच्छेयं ।
कोहादिदूसियमणो गोमणुयाईण नो कुज्ञा' ॥ (तथा)

॥ १ ॥ 'न मारयामीति कृतव्रतस्य, विनैव मृत्युं क इहातिचारः ।
निगद्यते यः कुपितः करोति, व्रतेऽनपेक्षस्तदसौ व्रती स्यात् ॥

॥ २ ॥ कायेन भग्न न तो व्रती स्यात्कोपाद्दयाहीनतया तु भग्नम् ।
तद्देशभङ्गादतिचार इष्टः, सर्वत्र योज्यः क्रम एष धीमन् ! ॥ (इती)

'सहसाअब्भक्खाणे' त्ति सहसा-अनालोच्याभ्याख्यानम्-असद्दोषाध्यारोपणं सहसाऽभ्याख्यानं, यथा ' 'चौरस्त्वम्' इत्यादि, एतस्य चातिचारत्वं सहसाकारेणैव, न तीव्रसंक्लेशेन भणनादिति १, 'रहसाअब्भक्खाणे' त्ति रहः-एकान्तस्तेन हेतुना अभ्याख्यानं रहोऽभ्याख्यानम्, एतदुक्तं भवति-रहसि मन्त्रयमाणानां वक्ति-एते हीदं चेदं च राजापकारादि मन्त्रयन्तीति, एतस्य चातिचारत्वमनाभोगमभणनात्, एकान्तमात्रोपाधितया च पूर्वस्माद्विशेषः, अथवा सम्भाव्यमानार्थभणनादतिचारो न तु भङ्गोऽयमिति २, 'सदारमन्तभेए'त्ति स्वदारसंबन्धिनो मन्त्रस्य-विश्रम्भजल्पस्य भेदः-प्रकाशनं स्वादारमन्त्रभेदः, एतस्य चातिचारत्वं सत्यभणनेऽपि कलत्रोक्ताप्रकाशनीय प्रकाशनेन लज्जादिभिर्मरणाद्यनर्थपरम्परासम्भवात्परमार्थतोऽसत्यत्वात्तस्येति ३, 'मोसोवएसे' त्ति मृषोपदेशः-परेषामसत्योपदेशः सहसाकारानाभोगादिना, व्याजेन वा यथा 'अस्माभिस्तदिदमिदं वाऽसत्यमभिधाय परो विजित' इत्येवंवार्त्ताकथनेन परेषामसत्य- वचनव्युत्पादनमतिचारः, साक्षात्कारेणासत्येऽप्रवर्त्तनादिति ४, 'कूडलेहकरणे' त्ति असद्भूतार्थस्य लेखस्य विधानमित्यर्थः, एतस्य चातिचारत्वं प्रमादादिना दुर्विवेकत्वेन वा, 'मया मृषावादः प्रत्या- ख्यातोऽयं तु कूडलेखो, न मृषावादनम्' इति भावयत इति ५,

वाचनान्तरे तु 'कन्नालियं गवालियं भूमालियं नासावहारे कूडसक्खिज्जं सन्धिकरणे'त्ति पठ्यते, आवश्यकादौ पुनरिमे स्थूलमृषावादभेदा उक्ताः, ततोऽयमर्थः सम्भाव्यते-एते एव प्रमादासहसाकारानाभोगैरभिधीयमाना मृषावादविरतेरतिचारा भवन्ति, आकुट्टया तु भङ्गा इति, एतेषां चेदं स्वरूपम्-कन्या-अपरिणीता स्त्री तदर्थमलीकं कन्यालीकं तेन च लोकेऽतिगर्हितत्वादिहोपात्तेन सर्वं मनुष्यजातिविषयमलीकमुपलक्षितं, एवं गवालीकमपि चतुष्पदजात्यलीकोपलक्षणं, भूम्यलीकमपदानां सचेतनाचेतनवस्तूनामलीकस्योपलक्षणं, न्यासो-द्रव्यस्य निक्षेपः, परैः समर्पितं द्रव्यमित्यर्थः, तस्यापहारः-अपलपनं न्यासापहारः, तथा कूटम्-असद्भूतमसत्यार्थसंवादनेन साक्ष्यं-साक्षिकर्म कूटसाक्ष्यं, कस्मिन्नित्याह-'सन्धिकरणे' द्वयोर्विवदमानयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्धानकरणे, विवादच्छेद इत्यर्थः, इह च न्यासापहारादिद्वयस्य आद्यत्रयान्तर्भावेऽपि प्रधान-विवक्षयाऽपह्नवसाक्षिदानक्रियमयोर्भेदेनोपादानं द्रष्टव्यमिति।

'तेनाहडे' त्ति स्तेनाहृतं-चौरानीतं, तत्समर्घमिति लोभात्काणक्रयेण गृह्णतोऽतिचरति तृतीयव्रतमित्यतिचारहेतुत्वात् स्तेनाहृतमित्यतिचार उक्तः, अतिचारता चास्य साक्षाच्चौर्याप्रवृत्तेः १, 'तक्करप्पओगे'त्ति तस्करप्रयोगश्चौरव्यापारणं, 'हरत यूयम्' इत्येवमभ्यनुज्ञानमित्यर्थः, अस्याप्यतिचारताऽनाभोगादिभिरिति २, 'विरुद्धरज्जाइक्कमे' त्ति विरुद्धनृपयो राज्यं तस्यातिक्रमः-अतिलङ्घनं विरुद्धाराज्यातिक्रम न हि ताभ्यां तत्रातिक्रमोऽनुज्ञातः, चौर्यबुद्धिरपि तस्य तत्र नास्तीति, अतिचारताऽस्यानाभोगादिना इति ३, 'कूडतुलकूडमाणे'त्ति तुला-प्रतीता मानं-कुडवादि कूटत्वं-न्यूनाधिकत्वं, ताभ्यां न्यूनाभ्यां ददतोऽधिकाभ्यां गृह्णतोऽतिचरति व्रतमिति अतिचारहेतुत्वा-दतिचारः कूटतुलाकूटमानमुक्तः, अतिचारत्वं चास्यानाभोगादेः, अथवा 'नाहं चौरः क्षत्रखन- नादेरकरणात्' इत्यभिप्रायेण व्रतसापेक्षत्वात् ४, 'तप्पडिरूवगववहारे' त्ति तेन-अधिकृतेन प्रतिरूपकं-सदृशं तत्प्रतिरूपकं तस्य विविधमवहरणं व्यवहारः-प्रक्षेपस्तत्प्रति-रूपकव्यवहारः, यद्यत्र घटते व्रीहिघृतादिषु पलञ्जीवसादि तस्य प्रक्षेप इतियावत्, तत्प्रतिरूपकेन वा वसादिना व्यवहरणं तत्प्रतिरूपकव्यवहारः, अतिचारता चास्य पूर्ववत् ५।

'सदारसंतोसीए'त्ति स्वदारसन्तुष्टेरित्यर्थः, 'इत्तरियपरिग्गहियागमणे'त्ति इत्वरकाल-परिगृहीता कालशब्दलोपादित्वपरिगृहीता-भाटीप्रदानेन कियन्तमपि कालं दिवसमासादिकं स्ववशीकृतेत्यर्थः, तस्यां गमनं-मैथुनासेवनमित्वरपरिगृहीतागमनं, अतिचारता चास्यातिक्रमा-दिभिः १, 'अपरिग्गहियागमणे'त्ति अपरिगृहीता नाम वेश्या अन्यसत्कपरिगृहीतभाटिका कुलाङ्गना वा अनाथेति, अस्याप्यातिचारताऽतिक्रमादिभिरेव २, 'अनङ्गकीड'त्ति अनङ्गानिमैथुनकर्मापेक्षया कुचकुक्षोरुवदनादीनि तेषु क्रीडनमनङ्गक्रीडा, अतिचारता चास्य स्वदारेभ्योऽन्यत्र मैथुनपरिहारेणा-नुरागादालिङ्गनादि विदधतो व्रतमालिन्यादिति ३, 'परविवाहकरणे'त्ति परेषाम्-आत्मन आत्मीया-पत्येभ्यश्च व्यतिरिक्तानां विवाहकरणं परविवाहकरणं, अयमभिप्रायः-स्वदारसन्तोषिणो हिन युक्तःपरेषां विवाहादिकरणेन मैथुननियोगोऽनर्थको विशिष्टविरतियुक्तत्वादित्येवमनाकलयतः परार्थकरणोद्यततयाऽतिचारोऽयमिति ४, 'कामभोगतिव्वाभिलासे' त्ति कामौ-शब्दरूपे भोगाः-गन्धरसस्पर्शास्तेषु तीव्राभिलाषः-अत्यन्तं तदध्यवसायितं कामभोगतीव्राभिलाषः, अयम-भिप्रायः-स्वदारसन्तोषी हि विशिष्टविरतिमान्, तेन च तावत्येव मैथुनासेवा कर्तुमुचिता यावत्या वेदजनिता बाधोपशाम्यति, यस्तु वाजिकरणादिभिः कामशास्त्रविहितप्रयोगैश्च तामधिकामुत्पाद्य सततं सुरतसुखमिच्छति स मैथुनविरतिव्रतं परमार्थतो मलिनयति, को हि नाम सकर्णकः पामामुत्पाद्याग्निसेवाजनितं सुखं वाञ्छेदिति अतिचारत्वं कामभोगतीव्राभिलाषस्येति ५

'खेतवत्थुपमाणाइक्कमे' त्ति क्षेत्रवस्तुनः प्रमाणातिक्रमः, प्रत्याख्यानकालगृहीतमानोल्लङ्घन-मित्यर्थः, एतस्य चातिचारत्वमनाभोगादिनाऽतिक्रमादिना वा, अथवा एकक्षेत्रादिपरिमाणकर्तुस्त-दन्यक्षेत्रस्य वृत्तिप्रभृतिसीमापनयनेन पूर्वक्षेत्रे योजना क्षेत्रप्रमाणातिक्रमोऽतिचार एव, व्रतसापेक्षत्वात्तस्येति १, 'हिरण्णसुवण्णपमाणाइक्कमे' त्ति प्राग्वत्, अथवा राजादेःसकाशाल्लब्धं हिरण्याद्यभिग्रहावधिं यावदन्यस्मै प्रयच्छतः 'पुनरवधिपूर्तौ ग्रहीष्यामि' इत्यध्यवसायवतोऽ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यमतिचारस्तथैवेति २, 'धणधन्नपमाणाइक्कमे' त्ति अनाभोगादेः अथवा लभ्यमानं धनाद्यभिग्रहावधिं यावत्परगृह एव बन्धनबद्धं कृत्वा धारयतोऽतिचारोऽयमिति ३, 'दुपयचउप्पयपमाणाइक्कमे' त्ति अयमपि तथैव, अथवा गोवडवादिचतुष्पदयोषित्सु यथा अभिग्रहकालावधीपूर्तौ प्रमाणाधिक-वत्सादिचतुष्पदोत्पत्तिरभवति तथा षण्ढादिकं प्रक्षिपतोऽतिचारोऽयं, तेन हि जातमेव वत्सादिकमपेक्ष्य प्रमाणातिक्रमस्य परिहृतत्वाद्गर्भगतापेक्षया तस्य सम्पन्नत्वादिति ४, 'कुवियपमाणाइक्कमे' त्ति कुप्यं—गृहोपस्करः स्थालकच्चोलकादि, अयं चातिचारोऽनाभोगादिना, अथवा पञ्चैव स्थालानि परिग्रहीतव्यानीत्याद्यभिग्रहवतः कस्याप्यधिकतराणां तेषां सम्पत्तौ प्रत्येकं द्वयादिमेलनेन पूर्वसङ्ख्यावस्थापनेनातिचारोऽयमिति ५, आह च—

॥१॥ "खेत्ताइहिरण्णाईधणाइदुपयाइकुप्पमाणकमे ।
जोयणपयाणबन्धणकारणभावेहि नो कुज्जा ॥"

दिग्व्रतं शिक्षाव्रतानि च यद्यपि पूर्वं नोक्तानि तथापि तत्र तानि द्रष्टव्यानि, अतिचारभण-नस्यान्यथा निरवकाशता स्यादिहेति, कथमन्यथा प्रागुक्तं—"दुवालसविहं सावगधम्मं पडिवज्जि-स्सामि" इति, कथं वा वक्ष्यति—'दुवालसविहं सावगधम्मं पडिवज्जइ' इति, अथवा सामायिकादी-नामित्वरकालीनत्वेन प्रतिनियतकालकरणीयत्वान्न तदैव तान्यसौ प्रतिपन्नवान् दिग्व्रतं च विरतेरभावाद् उचितावसरे तु प्रतिपत्स्यत इति भगवतस्तदतिचारवर्जनोपदेशनमुपपन्नं, यच्चोक्तं 'द्वादशविधं गृ—हिधर्मं प्रतिपत्स्ये' यच्च वक्ष्यति—'द्वादशविधं श्रावकधर्मं प्रतिपद्यते' तद् यथाकालं तत्करणाभ्युपगमनादनवद्यचमवसेयमिति ।

तत्र 'उड्ढदिसिपमाणाइक्कमे' त्ति, क्वचिदेवं पाठः, क्वचित्तु 'उड्ढदिसाइक्कमे' त्ति, एते चोर्ध्वादिगाद्यतिक्रमा अनाभोगादिनाऽतिचारतयाऽवसेयाः १—३, 'खेत्तवुड्ढि' त्ति एकतो योजनशतपरिमाणमभिगहीतमन्यतो दश योजनान्यभिगृहीतानि, ततश्च यस्यां दिशि दश योजनानि तस्यां दिशि समुत्पन्ने कार्ये योजनशतमध्यादपनीयान्यानि दश योजनानि तत्रैव स्वबुद्ध्या प्रक्षिपति, संवर्धयत्येकत इत्यर्थः, अयं चातिचारो व्रतसापेक्षत्वादवसेयः ४, 'सइअन्तरद्ध' त्ति स्मृत्यन्तर्धा—स्मृत्यन्तर्धानं स्मृतिभ्रंशः 'किं मया व्रतं गृ—हीतं शतमर्यादया पञ्चाशन्मर्यादया वा ?' इत्येवमस्मरणे योदजनशतमर्यादायामपि पञ्चशतमतिक्रामतोऽयमातिचारोऽवसेय इति ५ ।

'भोयणओ कम्मओ य' त्ति भोजनतो—भोजनमाश्रित्य वाह्याभ्यन्तरभोजनीय-वस्तून्यपेक्ष्येत्यर्थः, 'कर्मतः' क्रियां जीवनवृत्तिं बाह्याभ्यन्तरभोजनीयवस्तुप्राप्तिनिमित्त- भूता-माश्रित्येत्यर्थः, 'सचित्ताहारे' त्ति सचेतनाहारः, पृथिव्यप्कायवनस्पतिकायजीवशरीरिणां सचेतनानामभ्यवहरणमित्यर्थः, अयं चातिचारः कृतसचित्ताहारप्रत्याख्यानस्य कृततत्परिमाणस्य वाऽनाभोगादिना प्रत्याख्यातं सचेतनं भक्षयतस्तद्वा प्रतीत्यातिक्रमादौ वर्तमानस्य १, 'सचित्तपडिबद्धहारे' त्ति सचित्ते वृक्षादौ प्रतिबद्धस्य गुन्दादेरभ्यवहरणम्, अथवा सचित्ते—अस्थिके प्रतिबद्धं यत्पक्वमचेतनं खर्जूरफलादि तस्य सास्थिकस्य कटाहमचेतनं भक्षयिष्यामीतरत्परिहरिष्यामि इति भावनया मुखे क्षेपणमिति, एतस्य चातिचारत्वं व्रतसापक्षत्वादिति २, 'अप्पउलिओस-हिभक्खणय' त्ति अपक्वायाः—अग्निनाऽसंस्कृतायाः ओषधेः—शाल्यादिकाया भक्षणता—भोजन-मित्यर्थः, अस्याप्यतिचारताऽनाभोगादिनैव, ननु सचित्ताहारातिचारेणैव अस्य संगृहीतत्वात्किं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदोपादानेनेति?, उच्यते, पूर्वोक्तपृथिव्यादिसचित्तसामान्यापेक्षया ओषधीनां सदाभ्यवहरर्नीयत्वेन प्राधान्यख्यापनार्थं, दृश्यते च सामान्योपादाने सत्यपि प्राधान्यापेक्षया विशेषोपादानमिति ३, 'दुप्पउलिओसहिभक्खणया' दुप्पकाःअग्निना ओषधयस्तद्भक्षणता, अतिचारता चास्य पक्वबुद्धया भक्षयतः ३, 'तुच्छोसहिभक्खणय'त्ति तुच्छाः—असारा ओषधयः—अनिष्पन्न-मुद्गफलीप्रभृतयः, तद्भक्षणे हि महती विराधना स्वल्पाच्च तत्कार्य तृप्तिरिति विवेकिनाऽ- चित्ताशिनाता अचित्तीकृत्य न भक्षणीया भवन्ति, तत्करणेनापि भक्षणेऽतिचारो भवति, व्रतसापे- क्षत्वात्तस्येति ५, इह च पञ्चातिचारा इत्युपलक्षणमात्रमेवावसेयं, यतो मधुमद्यमांसरात्रिभोजना- दिव्रतिनामनाभोगातिक्रमादिभिरनेके ते सम्भवन्तीति ॥

'कम्मओ ण'मित्यादि, कर्मतो यदुपभोगव्रतं 'खरकर्मादिकं कर्म प्रत्याखायमि' इत्येवंरूपं तत्र श्रमणोपासकेन पञ्चदश कर्मादानानि वर्जनीयानि, 'इङ्गालकम्मे'त्ति अङ्गारकरणपूर्वकस्ताद्विक्रयः, एवं यदन्यदपि वह्निसमारम्भपूर्वकं जीवनमिष्टकाभाण्डकादिपाकरूपं तदङ्गरकर्मेति ग्राह्यं, समानस्वभावत्वात्, अतिचारता चास्य कृतैतत्प्रत्याख्यानस्यानाभोगादिना अत्रैव वर्त्तनादिति, एवं सर्वत्र भावना काय्या १, नवरं 'वनकर्म' वनस्पतिच्छेदनपूर्वकं तद्विक्रयजीवनं २, 'शकटकर्म' शकटानां घटनविक्रयवाहनरूपं ३, 'भाटककर्म' मूल्यार्थ गन्त्र्यादिभिः परकीयभाण्डवहनं ४, 'स्फोटकर्म' कुद्दालहलादिभिर्भूमिदारणेन जीवनं ५, 'दन्तवाणिज्यं' हस्तिदन्तशङ्खपूतिकेशादीनां तत्कर्मकारिभ्यः क्रयेण तद्विक्रयपूर्वकं जीवनं ६, लाक्षावाणिज्यं सञातजीवद्रव्यान्तरविक्रयोपलक्षणं ७, 'रसवाणिज्यं' सुरादिविक्रयः ८, विषवाणिज्यं जीवघातप्रयोजनशस्त्रादिविक्रयोपलक्षणं ९, 'केशवाणिज्यं' केशवतां दासगवोष्ट्रहस्त्यादिकानां विक्रयरूपं १०, 'यन्त्रपीडनकर्म' यन्त्रेण तिलेक्षप्रभृतीनां यत्पीडनरूपं कर्म तत् ११, तथा 'निर्लाञ्छनकर्म' वर्धितककरणं १२, दवाग्नेः—वनाग्नेर्दानं—वितरणं क्षेत्रादिशोधननिमित्तं दवाग्निदानमिति १३, 'सरोह्रदतडागपरिशोपणता' तत्र सरः—स्वभावनिष्पन्नं—ह्रदो—नद्यादीनां नम्नतरःप्रदेशः तडागं—खननसम्पन्नमुत्तानविस्तीर्णजलस्थानं एतेषां गोधूमादीनां वपनार्थं १४, 'असतीजनपोषणता' असतीजनस्य—दासीजनस्य पोषणं तद्भाटिकोपजीवनार्थं यत्तत् तथा, एवमन्यदपि क्रूरकर्मकारिणः प्राणिनः पोषणमसतीजनपोषणमेवेति १५।

'कन्दप्पे'त्ति कन्दर्पः—कामस्तद्धेतुर्विशिष्टो वाक्प्रयोगोऽपि कन्दर्प उच्यते, रागोद्रेकात् प्रहासमिश्रं मोहोद्दीपकं नर्मेति भावः, अयं चातिचारः प्रमादाचरितलक्षणानर्थदण्डभेदव्रतस्य सहसाकारादिनेति १, 'कुक्कुइए'त्ति कौत्कुच्यम् अनेकप्रकारा मुखनयनादिविकारपूर्विका परिहासादिजनिका भाण्डानामिव विडम्बनाक्रिया, अयमपि तथैव २, 'मोहरिए'त्ति मौख्य धार्ष्ट्यप्रायमसत्यासम्बद्धप्रलापित्वमुच्यते, अयमातिचारःप्रमादव्रतस्य पापकर्मपदेशव्रतस्य वाऽनाभोगादिनैव ३, 'संजुत्ताहिगरणे'त्ति संयुक्तम्—अर्थक्रियाकरणक्षममधिकरणम्—उदूखलमुशलादि, तदतिचारहेतुत्वादतिचारो हिंस्रप्रदाननिवृत्तिविपयः, यतोऽसौ साक्षाद्यद्यपि हिं शकटादिकं न समर्पयति परेषां तथापि तेन संयुक्तेन तेऽयाचित्वाऽप्यर्थक्रियां कुर्वन्ति, विसंयुक्ते तु तस्मिंस्ते स्वत एव विनिवारिता भवन्ति ४, 'उवभोगपरिभोगाइरित्ते'त्ति उपभोगपरिभोगविपयभूतानि यानि द्रव्याणि स्नानप्रक्रमे उष्णोदकोद्वर्तनकामलकादीनि भोजनप्रक्रमे अशनपानादीनि तेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदतिरिक्तम्– अधिकमात्मादीनामर्थक्रियासिद्धावप्यवशिष्यते तदुपभोगपरिभोगातिरिक्तं, तदुपचारादतिचारः, तेन ह्यात्मोपभोगातिरिक्तेन परेषां स्नानभोजनादिभिरनर्थदण्डो भवति, अयं च प्रमादव्रतस्यैवातिचार इति ५। उक्ता गुणव्रतातिचाराः, अथ शिक्षाव्रतानां तानाह–

'सामाइयस्स' त्ति समो–रागद्वेष- वियुक्तो यः सर्वभूतान्यात्मवत्पश्यति तस्य आयः– प्रतिक्षणमपूर्वापूर्वज्ञानदर्शनतचारित्रपर्यायाणां निरुपमसुखहेतुभूतानामधःकृतचिन्तामणिकल्प-द्रुमोषमानां लाभः समायः सः प्रयोजनम-स्यानुष्ठानस्येति सामायिकं तस्य–सावद्ययोगनिषेधरूपस्य निरवद्ययोगप्रतिषेधस्वभावस्य च 'मणदुप्पणिहाणे' त्ति मनसो दुष्टं प्रणिधानं प्रयोगो मनोदुष्प्रणिधानं कृतसामायिकस्य गृहेतिकर्मव्य-तायां सुकृतदुष्कृतपरिचिन्तनमिति भावः १, 'वयदुप्पाणिहाणे' त्ति कृतसामायिकस्य निष्ठुरसाव- द्यवाक्प्रयोगः २, 'कायदुप्पणिणे' त्ति कृतसामायिकस्याप्रत्युपेक्षि-तादीभूतलादौ करचरणादीनां देहावयवानामनिभृतस्थापनमिति ३, 'सामाइयस्स सइअकरणय' त्ति सामायिकस्य सम्बन्धिनी या स्मृतिः–अस्यां वेलायां मया सामायिकं कर्तव्यं, तथा कृतं तन्न वा इत्येवंरूपं स्मरणं, तस्याः प्रबलप्रमादतयाऽकरणं स्मृत्यकरणं ४, 'अणवट्ठियस्स करणय' त्ति अनवस्थितस्य अल्पकालीन- स्यानियतस्य वा सामायिकस्य करणमनवस्थितकरणम्, अल्पकाल करणानन्तरमेव त्यजति यथाकथञ्चिद्वा तत्करोतीति भावः ५, इह चाद्यत्रयस्यानाभोगादिनाति-चारत्वम् उतरद्वयस्य तु प्रमादबहुलतयेति ॥

'देसावगासियस्स' त्ति दिग्व्रतगृहीतदिक्परिमाणस्यैकदेशो देशस्तस्मिन्नवकाशो–गमनादिचेष्टास्थानं देशावकाशस्तेन निर्वृत्तं देशावकाशिकं–पूर्वगृहीतदिग्व्रतसङ्क्षेपरूपंसर्वपव्रत-सङ्क्षेपरूपं चेति, 'आणवणप्पओगे' त्ति इह विशिष्टावधिके भूदेशाभिग्रहे परतः स्वयंगमना-योगाद्यदन्यःसचित्तादिद्रव्यानयने प्रयुज्यते सन्देशकप्रदानादिना त्वयेदमानेयम् इत्यानमयनप्रयोगः १, 'पेसवणप्पओगे' बलाद्विनियोज्यः प्रेष्यस्तस्य प्रयोगो, यथाभिगृहीतप्रविचारदेशव्यतिक्रमभयात् "त्वयाऽवश्यमेव तत्र गत्वा मम गवाद्यानेयं इदं वा तत्र कर्तव्यम्" इत्येवंभूतः प्रेष्यप्रयोगः २, 'सद्दाणुवाए' त्ति स्वगृहवृत्तिप्राकारद्यवच्छिन्नभूप्रदेशाभिग्रहे बहिः प्रयोजनोत्पत्तौ तत्र स्वयंगमनायोगाद्वृत्तिप्राकारादिप्रत्यासन्नवर्तिनो बुद्धिपूर्वकं तसभ्युत्काशितादिशब्दकरणेन समवसितकान् बोधयतः शब्दानुपातः, शब्दस्यानुपातनम्–उच्चारणं तादर्ग्येन परकीयश्रवणविव-रमनुपतत्यसाविति ३, 'रूवाणुवाए' त्ति अभिगृहीकतदेशाद्बहिः प्रयोजनभावे शब्दमनुच्चारयत एव परेषां स्वसमीपानयनार्थं स्वशरीररूपदर्शनं रूपानुपातः ४ 'बहिया पोग्गलपक्खेवे' त्ति अभिगृही-तदेशाद्बहिः प्रयोजनसद्भावे परेषां प्रबोधनाय लेष्टूवादिपुद्गलप्रक्षेप इति भावना ५, इह चाद्यद्वयस्यानाभोगादिनाऽतिचारत्वं इतरस्य तु त्रयस्य व्रतसापेक्षत्वादिति ॥

'पोसहोववासस्स' त्ति इह पोषधशब्दोऽष्टम्यादिपर्वसु रूढः, तत्र पोषधे उपवासः पोषधोप-वासः, स चाहारादिविषयभेदाच्चतुर्विध इति तस्य, 'अप्पडिलेहिये' त्यादि अप्रत्युपेक्षितो–जीवरक्षार्थं चक्षुषा न निरीक्षित; 'दुष्प्रत्युपेक्षितः' उद्भ्रान्तचेतोवृत्तितयाऽसम्यग्निरीक्षितः शय्या– शयनं तदर्थं समस्तारकः–कुशकम्बलफलकादिः शय्यासंस्तारकः ततः पदत्रयस्य कर्मधारये भवत्यप्रत्युपेक्षितदुष्प्रत्युपेक्षितशय्यासंस्तारकः, एतदुपभोगस्यातिचारहेतुत्वादयमतिचार उक्तः १, 'एवमप्रमार्जितदुष्प्रमार्जितशय्यासंस्तारकोऽपि' नवरं प्रमार्जनं वसनाञ्चलादिना २, एवमितरौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वौ, नवरमुच्चारः–पुरिषं, स्रवणं, मूत्रं तयोर्भूमिः स्थण्डिलम् ३, ४, एते चत्वारोऽपि प्रमादितयाऽतिचाराः, पोसहोववासस्स सम्म अननुपालणय' त्ति कृतपोषधोपवासस्यास्थिर-चित्ततयाऽऽहार-शरीरसत्काराब्रह्मव्यापाराणामभिलषणादननुपालना पोषधस्येति, अस्य चातिचारत्वं भावतो विरतेर्बाधितत्वादिति ॥

'अहासंविभागस्से'ति अहत्ति–यथासिद्धस्य स्वार्थं निर्वर्तितस्येत्यर्थः, अशनादेः समिति–सङ्गतत्वेन पश्चात्कर्मादिदोषपरिहारेण विभजनं साधवे दानद्वारेण विभागकरणं यथासंविभागःतस्य, 'सचित्तनिक्खिवणये' त्यादि सचित्तेषु व्रीह्यादिषु निक्षेपणमन्नादेरदानबुद्धया मातृस्थानतः सचित्तनिक्षेपणं १, एवं सचित्तेन फलादिना स्थगनं सचित्तपिधानं २, 'कालातिक्रमः' कालस्य–साधुभोजनकालस्यातिक्रमः–उल्लङ्घनं कालातिक्रमः, अयमभिप्रायः, कालमूनमधिकं वा ज्ञात्वा साधवो न ग्रहीष्यन्ति ज्ञास्यन्ति च यथाऽयंददाति एवं विकल्पतो दानार्थम्युत्थानमतिचार इति ३, तथा 'परव्यपदेशः' परकीयमेतत् तेन साधुभ्यो न दीयते इति साधुसमक्षं भणनं, जानन्तु साधवो यद्यस्यैतद्भक्तादिकं भवेकत्तदा कथमस्मभ्यं न दद्याद् ? इति साधुसम्प्रत्ययार्थम् भणनं, अथवा अस्माद्दानान्मम मात्रादेः पुण्यमस्त्विति भणनमिति ४, 'मत्सरिता' अपरेणेदं दत्तं किमहं तस्मादपि कृपणो हीनो वा अतोऽहमपि ददामि इत्येवंरूपो दानप्रवर्तकविकल्पो मत्सरिता ५,

एते चातिचारा एव, न भङ्गाः, दानार्थमभ्युत्थानाद् दानपरिणतेश्च दूषितत्वाद्, भङ्गस्वरूपस्य चेहैवमभिधानाद्, यथा–

॥ १ ॥ दानन्तरायदोसा न देइ दिज्जन्तयं च वारेइ ।
दिन्ने वा परितप्पइ इति किवणत्ता भवे भङ्गो ॥

आवश्यकटीकायां हि न भङ्गातिचारयोर्विशेषेऽस्माभिरवबुद्धः, केवलमिह भङ्गाद्विवेकं कुर्वद्भिरस्माभिरतिचारा व्याख्याताःसम्प्रदायात् नवपदादिषु तथा दर्शनात्,

॥ २ ॥ जारिसओ जइभेओ जह जायइ जहेव तत्थ दोसगुणा ।
जयणा जह अइयारा भङ्गा तह भावणा नेया ॥

इत्यस्या आवश्यकचूर्ण्यां पूर्वगतगाथाया दर्शनात्, अतिचारशब्दस्य सर्वभङ्गे प्रायोऽप्रसिद्धत्वाच्च, ततो नें शङ्कनीयं य एतेऽतिचारा उक्तास्ते भङ्गा एवेति, तथा य एते प्रतिव्रतं पञ्चपञ्चातिचारास्त उपलक्षणमतिचारान्तराणामसेया न त्ववधारणं, यदाहुः पूज्याः–

॥ १ ॥ "पञ्चे पञ्चाइयारा उ, सुत्तम्मि जे पदंसिया ।
ते नावहारणट्ठाए, किन्तु ते उवलक्खणं ॥" इति,

इदं चेह तत्त्वं–यत्र व्रतविषयेऽनाभोगादिनाऽतिक्रमादिपदत्रयेण वा स्वबुद्धिकल्पनया वा व्रतसापेक्षतया व्रतविषयं परिहरतः प्रवृत्तिः सोऽतिचारो, विपरीततायां तु भङ्गः, इत्येवं सङ्कीर्णातिचारपदगमनिका कार्या ।

अथ सर्वविरतावेवातिचारा भवन्ति, देशाविरतौ तु भङ्गा एव, यदाह–

॥ १ ॥ "सव्वेऽवि य अइयारा सञ्जलणाणं तु उदयओ हुन्ति ।
मूलच्छेज्जं पुण होइ बारसण्हं कसायाणं ॥"

अत्रोच्यते, इयं हि गाथा सर्वविरतावेवातिचारभङ्गोपदर्शनार्था, न देशविरत्यादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भङ्गदर्शनार्था, तथैव वृत्तौ व्याख्यातत्वात्, तथा सञ्ज्वलनोदयविशेषे सर्वविरतिविशेषस्यातिचारा एव भवन्ति, न मूलच्छेदः, प्रत्याख्यानावरणादीनां तूदये पश्चानुपूर्व्या सर्वविरत्यादीनां मूलतःछेदो भवतीत्येवंभूतव्याख्यानान्तरेऽपि न देशविरत्यादावतिचाराभावः सिध्यति, यतो यथा संयतस्य चतुर्थानामुदये यथाख्यातचारित्रं भ्रश्यति इतरचारित्रं सम्यकत्वं च सातिचारमुदयविशेषान्निरतिचारं च भवतीति एवं तृतीयोदये सरागचरणं भ्रश्यति देशविरतस्य तु देशविरतिसम्यकत्वे सातिचारे निरतिचारे च प्रत्येकं तथैव स्यातां, द्वीतीयोदये देशविरतिर्भ्रश्यति, सम्यकत्वं तु तथैव द्विधा स्यात्, प्रथमोदये तु सम्यकत्वं भ्रश्यतीति, एवं चैतत्, कथमन्यथा सम्यकत्वातिचारेषु दैशिकेषु प्रायश्चित्तं तप एव निरूपितं, सार्विकेषु तु मूलमिति, अथानन्तानुबन्ध्यादयो द्वादश कषायाः सर्वघातिनः सञ्ज्वलनास्तु देशघातिन इति, ततश्च सर्वघातिनामुदये मूलमेव, देशघातिनां त्वतिचार इति, सत्यं, किन्तु यदेतत्सर्वघातित्वं द्वादशानां कषायाणां तत्सर्वविरत्यपेक्षमेव शतकचूर्णिकारेण व्याख्यातं, न तु सम्यकत्वाद्यपेक्षमिति, तथा हि तद्वाक्यं-"भगवप्पणीयं पञ्चमहव्वयमइयं अट्ठारसीलङ्गसहस्सकलियं चारित्तं घाएन्ति त्ति सव्वघाइणो" त्ति

किञ्च-प्रागुपदर्शितायाः 'जारिसओ' इत्यादिगाथायाः सामर्थ्यादतिचारभङ्गौ देशविरति-सम्यकत्वयोः प्रतिपत्तव्याविति 'अपच्छिमे' त्यादि, पश्चिमैवापश्चिमा मरणं-प्राणत्यागलक्षणं तदेवान्तो मरणान्तः तत्र भवामारणान्तिकी संलिख्यते-कृशीक्रियते शरीरकषायाद्यनयेति संलेखना-तपोविशेषलक्षणा ततः पदत्रयस्य कर्मधारयः तस्या जोषणा-सेवना तस्या आराधना, अखण्डकाल-करणमित्यर्थः, अपश्चिममारणान्तिकसंलेखनाजोषणाराधना, तस्याः, 'इहलोगे'त्यादि, इहलोको-मनुष्यलोकः तस्मिन्नाशंसा-अभिलाषः तस्याः प्रयोग इहलोकाशंसाप्रयोगः, श्रेष्ठी स्यां जन्मान्तरेऽमात्यो वा इत्येवंरूपा प्रार्थना १ एवं परलोकाशंसाप्रयोगो 'देवोऽहं स्याम्' इत्यादि २, 'जीविताशंसाप्रयोगो' जीवितं-प्राणधारणं तदाशंसायाः-तदभिलाषस्य प्रयोगो, यदि 'बहुकुलमहं जीवेयम्' इति। अयं हि संलेखनावान्कश्चिद्वस्त्रमाल्यपुस्तकवाचनादिपूजादर्शना- द्बहुपरिवाराव-लोकनाल्लोकश्लाघाश्रवणाचैवं मन्यते, यथा 'जीवितमेव श्रेयः,प्रतिपन्नानशनस्यापि यत एवंविधा मदुद्देशेन विभूतिर्वर्तते' इति ३, 'मरणाशंसाप्रयोगः' उक्तस्वरूपपूजाद्यभावे भावयत्यसौ यदि 'शीघ्रं म्रियेऽहम्' इतिस्वरूप इति ४, कामभोगशंसाप्रयोगो "यदि मे मानुष्यकाः कामभोगा दिव्या वा सम्पद्यन्ते तदा साधु" इति विकल्परूपः ५।

मू. (१०) तए णं से आनंदे गाहावई समणस्स भगवओ महावीरस्स अंतिए पंचाणुव्वइयं सत्तसिक्खावइयं दुवालसविहं सावयधम्मं पडिवज्जइ २ त्ता समणं भगवं महावीरं वंदइ नमंसइ २ त्ता एवं वयासी-

"नो खलु मे भंते! कप्पइ अज्जप्पभिइं अन्नउत्थिए वा अन्नउत्थियदेवयाणि वा अन्नउत्थिय-परिग्गहियाणि अरिहंतचेइयाणि वा वंदित्तए वा नमंसित्तए वा, पुव्विं अणालत्तेणं आलवित्तए वा संलवित्तए वा, तेसिं असनं वा पानं वा खाइमं वा साइमं वा दाउं वा अणुप्पदाउं वा, नन्नत्थ रायाभिओगेणं गणाभिओगेणं बलाभिओगेणं देवाभिओएगेणं गुरुनिग्गहेणं वित्तिकन्तारेणं कप्पइ मे समणे निग्गन्थे फासुएणं एसणिज्जेणं असनपानखाइमसाइमेणं वत्थपडिग्गहकम्बलपायपुंछणेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पीढफलयसिज्झासंथारएणं ओसहभेसज्जेणं य पडिलाभेमाणस्स विहरित्तएत्तिकट्टु इमं एयारूवं अभिग्गहं अभिगिण्हइ २ त्ता पमिणाइं पुच्छइ २ त्ता अट्ठाइं आदियइ २ त्ता, समणं भगवं महावीरं तिक्खुत्तो वन्दइ २ त्ता समणस्स भगवओ महावीरस्स अंतियाओ दूइपलासाओ चेइयाओ पडिनिक्खमइ २ त्ता जेणेव वाणियगामे नयरे जेणेव सए गिहे तेणेव उवागच्छइ २ त्ता सिवानन्दं भारियं एवं वयासी–एवं खलु देवाणुप्पिए ! मए समणस्स भगवओ महावीरस्स अंतिए धम्मे निसंते, सेऽपि य धम्मे मे इच्छिए पडिच्छिए अभिरुइए,

तं गच्छ णं तुमं देवाणुप्पिए ! समणं भगवं महावीरं वंदाहि जाव पज्जुवासाहि, समणस्स भग० महावीरस्स अंतिए पंचाणुव्वइयं सत्तसिक्खावइयं दुवालसविहं गिहिधम्मं पडिवज्जाहि ।

वृ. 'नो खलु' इत्यादि, नो खलु मम 'भदन्त !' भगवन् ! 'कल्पते' युज्यते 'अद्यप्रभृति' इतः सम्यकत्वप्रतिपत्तिदिनादारभ्यनिरतिचारसम्यकत्वपरिपालनार्थं तद्यतनामाश्रित्य 'अन्नउत्थिए व' त्ति जैनयूथाद् यदन्यद् यूथं–सङ्घान्तरं तीर्थान्तरमित्यर्थः तदस्ति येषां तेऽन्ययूथिकाः–चरकादिकुतीर्थिकाः तान्, अन्ययूथिकदैवतानि वा–हरिहरादीनि अन्ययूथिकपरिगृहीतानि वा चैत्यानि–अर्हत्प्रतिमालक्षणानि, यथा भौतपरिगृहीतानि वीरभद्रमहाकालादीनि 'वंदितुं वा' अभिवादनं कर्तुं 'नमस्कर्तुं वा' प्रणामपूर्वकं प्रशस्तध्वनिभिर्गुणोत्कीर्तनं कर्तुं तद्भक्तुं तां मिथ्यात्वस्थिरीकरणादिदोषप्रसङ्गादित्यभिप्रायः तथा पूर्वं–प्रथममनालप्तेन सता अन्यतीर्थिकैः तानेव 'आलपितुं वा' सकृत्सम्भाषितुं 'संलपितुं वा' पुनः पुनः संलापं कर्तुं, यतस्ते तप्ततरायोगोलकल्पाः खल्वासनादिक्रियायां नियुक्ता भवन्ति, तत्प्रत्ययश्च कर्मबन्धः स्यात्, तथाऽऽलापादेः सकाशात्परिचयेन तस्यैव तत्परिजनस्य वा मिथ्यात्वप्राप्तिरिति, प्रथमालप्तेन त्वसम्भ्रमं लोकापवादभयात् "कीदृशस्त्वम्" इत्यादि वाच्यमिति, तथा 'तेभ्यः' अन्ययूथिकेभ्योऽशनादि दातुं वा सकृत् अनुप्रदातुं वा पुनः पुनरित्यर्थः, अयं च निषेधो धर्मबुद्ध्यैव, करुणया तु दद्यादपि,

किं सर्वथा न कल्पत इत्याह–'नन्नत्थ रायाभिओगेणं' ति 'न' इति न कल्पत इति योऽइयं निषेधः सोऽन्यत्र राजाभियोगात्, तृतीयायाः पञ्चम्यर्थत्वाद् राजाभियोगं वर्जयित्वेत्यर्थः, राजाभियोगास्तु–राजपरतन्त्रता, गणः–समुदायस्तदभियोगो–पारवश्यता गणाभियोगस्तस्मात्, बलाभियोगो नाम–राजगणव्यतिरिक्तस्य बलवतः पारतन्त्रयं, देवताभियोगो–देवपरतन्त्रता, गुरुनिग्रहो–मातापितृपारवश्यं गुरुणां वा–चैत्यासाधूनां निग्रहःप्रत्यनीककृतोपद्रवो गुरुनिग्रहः तत्रोपस्थिते तद्रक्षार्थमन्ययूथिकादिभ्यो दददपि नातिक्रामनितसम्यकत्वमिति, 'वित्तिकन्तारेणं' ति वृत्तिःजीविका तस्याः कान्तारम्–अरण्यं तदिव कान्तारं क्षेत्रं कालो वा वृत्तिकान्तारं, निर्वाहाभाव इत्यर्थः, तस्मादन्यत्र निषेधो दानप्रणामादेरिति प्रकृतमिति, 'पडिग्गहं' ति पात्रं 'पीढं' ति पट्टादिकं 'फलगं' ति अवष्टम्भादिकं फलकं 'भेसज्जं' ति पथ्यं 'अट्ठाइं' ति उत्तरभूतानर्थानाददाति ॥

मू. (११) *तए णं सा सिवानंदा भारिया आनंदेणं समणोवासएणं एवं वुत्ता समाणा हट्ठतुट्ठा कोडुम्बियपुरिसे सद्दावेइ २ त्ता एवं वयासी–खिप्पामेव लहुकरण जाव पज्जुवासइ, तए णं समणे भगवं महावीरे सिवानंदाए तीसे य महइ० जाव धम्मं कहेइ,*

तए णं सा सिवानंदा समणस्स भगवओ महावीरस्स अंतिए धम्मं निसम्म हट्ठ जाव गिहिधम्मं पडिवज्जइ २ त्ता तमेव धम्मियं जाणप्पवरं दुरुहइ २ त्ता जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगया ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'लहुकरण'इत्यत्र यावत्करणात् 'लहुकरणजुत्तजोइयमित्यादिर्यानवर्णको व्याख्यास्यमान- सप्तमाध्ययनादवसेयः ॥

मू. (१२) *भंते त्ति भगवं गोयमे समणं भगवं महावीरं वंदइ नमंसइ २ त्ता एवं वयासी–पहू णं भन्ते! आणंदे समणोवासए देवाणुप्पियाणं अंतिए मुण्डे जाव पव्वइत्तए?, नो तिणट्ठे समट्ठे, गोयमा! आनंदे णं समणोवासए बहूइं वासाइं समणोवासगपरियागं पाउणिहिइ २ त्ता जाव सोहम्मे कप्पे अरुणे विमाणे देवत्ताए उववज्जिहिइ।*

तत्थ णं अत्थेगइयाणं देवाणं चत्तारि पलिओवमाइं ठिई पन्नत्ता। तत्थ णं आनंदस्सऽवि समणोवासगस्स चत्तारि पलिओवमाइं ठिई पन्नत्ता॥

तए णं समणे भगवं! महावीरे अन्नया कयाइ बहिया जाव विरहइ।

वृ. 'महावीरस्स अंतियं'ति अनते भवा आन्तिकी महावीरसमीपाभ्युपगतेत्यर्थः।

मू. (१३) *तए णं से आनंदे समणोवासए जाव अभिगयजीवाजीवे जाव पडिलाभेमाणे विहरइ। तए णं सा सिवानंदा भारिया समणोवासिया जाया जाव पडिलाभेमाणी विहरइ।*

